# Nrisimhashatchakra Upanishad

# નૃસિંહષટ્ચક્રોપનિષત્

## Document Information

Text title : nRRisiMhaShaTchakropaniShat

File name : nRRisiMhaShaTchakropaniShat.itx

Category : upanishhat, vishhnu, upanishad, dashAvatAra

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 29, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 29, 2020

*sanskritdocuments.org*

# નૃસિંહષટ્ચક્રોપનિષત્

ॐ દેવા હ વૈ સત્યં લોકમાયંસ્તં પ્રજાપતિમપૃચ્છન્નારસિંહચક્રન્નો બ્રૂહીતિ । તાન્પ્રજાપતિર્નારસિંહચક્રમવોચત્ । ષડ્વૈ નારસિંહાનિ ચક્રાણિ ભવન્તિ । યત્ પ્રથમં તચ્ચતુરરં યદ્વિતીયં તચ્ચતુરરં યત્તૃતીયં તદષ્ટારં યચ્ચતુર્થં તત્પઞ્ચારં યત્પઞ્ચમં તત્પઞ્ચારં યત્ ષષ્ઠં તદષ્ટારં તદેતાતિ ષડેવ નારસિંહાનિ ચક્રાણિ ભવન્તિ ॥

અથ કાનિ નામાનિ ભવન્તિ । યત્ પ્રથમં તદાચક્રં યદ્વિતીયં તત્સુચક્રં યત્તૃતીયં તન્મહાચક્રં યચ્ચતુર્થં તત્સકલલોકરક્ષણચક્રં યત્પઞ્ચમં તદ્દ્યૂતચક્રં યદ્વૈ ષષ્ઠં તદસુરાન્તકચક્રં તદેતાનિ ષડેવ નારસિંહચક્રનામાનિ ભવન્તિ ॥

અથ કાનિ ત્રીણિ વલયાનિ ભવન્તિ । યત્પ્રથમં તદાન્તરવલયં ભવતિ । યદ્દ્વિતીયં તન્મધ્યમં વલયં ભવતિ । યત્ તૃતીયં તદ્બાહ્યં વલયં ભવતિ । તદેતાનિ ત્રીણ્યેવ વલયાનિ ભવન્તિ । યદા તદ્વૈતદ્બીજં યન્મધ્યમં તાં નારસિંહગાયત્રીં યદ્બાહ્યં તન્મન્ત્રઃ ॥

અથ કિમાન્તરં વલયમ્ । ષડ્વાન્તરાણિ વલયાનિ ભવન્તિ । યન્નારસિંહં તત્પ્રથમસ્ય યન્માહાલક્ષ્મ્યં તદ્વિતીયસ્ય યત્સારસ્વતં તત્તૃતીયસ્ય યસ્ય યત્કામં દેવં તચ્ચતુર્થસ્ય યત્ પ્રણવં તત્પઞ્ચમસ્ય યત્ક્રોધદૈવતં તત્ ષષ્ઠસ્ય । તદેતાનિ ષણ્ણાં નારસિંહચક્રાણાં ષડાન્તરાણિ વલયાનિ ભવન્તિ ॥

અથ કિં મધ્યમં વલયમ્ । ષડ્વૈ મધ્યમાનિ વલયાનિ ભવન્તિ । યન્નારસિંહાય તત્પ્રથમસ્ય યદ્વિદ્મહે તદ્દ્વિતીયસ્ય યદ્વજ્રનખાય તત્તૃતીયસ્ય યદ્ધીમહિ તચ્ચતુર્થસ્ય યત્તન્નસ્તત્પઞ્ચમસ્ય યત્સિંહઃ પ્રચોદયાદિતિ તત્ ષષ્ઠસ્ય । તદેતાનિ ષણ્ણાં નારસિંહચક્રાણાં ષણ્મધ્યમાનિ વલયાનિ ભવન્તિ ॥

અથ કિં બાહ્યં વલયમ્ । ષડ્વૈ બાહ્યાનિ વલયાનિ ભવન્તિ ।
યદાચક્રં યદાત્મા તત્પ્રથમસ્ય યત્સુચક્રં યત્પ્રિયાત્મા તદ્વિતીયસ્ય
યન્મહાચક્રં યજ્જ્યોતિરાત્મા તત્તૃતીયસ્ય યત્સકલલોકરક્ષણચક્રં
યન્માયાત્મા તચ્ચતુર્થસ્ય યદાચક્રં યદ્યોગાત્મા તત્પઞ્ચમસ્ય
યદસુરાન્તકચક્રં યત્સત્યાત્મા તત્ ષષ્ઠસ્ય । તદેતાનિ ષણ્ણાં
નારસિંહચક્રાણાં ષટ્ બાહ્યાનિ વલયાનિ ભવન્તિ ॥

ક્વૈતાનિ ન્યસ્યાનિ । યત્પ્રથમં તદ્ધૃદયે યદ્વિતીયં તચ્છિરસિ
યત્તૃતીયં તચ્છિખાયાં યચ્ચતુર્થં તત્સર્વેષ્વઙ્ગેષુ
યત્પઞ્ચમં તત્સર્વેષુ (?) યત્ ષષ્ઠં તત્સર્વેષુ દેશેષુ ।
ય એતાનિ નારસિંહાનિ ચક્રાણ્યેતેષ્વઙ્ગેષુ બિભૃયાત્ તસ્યાનુષ્ટુપ્
સિધ્યતિ । તં ભગવાન્ નૃસિંહઃ પ્રસીદતિ । તસ્ય કૈવલ્યં સિધ્યતિ ।
તસ્ય સર્વે લોકાઃ સિધ્યન્તિ । તસ્ય સર્વે જનાઃ સિધ્યન્તિ । તસ્માદેતાનિ
ષણ્ણાં નારસિંહચક્રાણ્યઙ્ગેષુ ન્યસ્યાનિ ભવન્તિ । પવિત્રં ચ એતત્તસ્ય
ન્યસનમ્ । ન્યસનાન્નૃસિંહાનન્દી ભવતિ । કર્મણ્યો ભવતિ । બ્રહ્મણ્યો
ભવતિ । અન્યસનાન્ન નૃસિંહાનન્દી ભવતિ । ન કર્મણ્યો ભવતિ ।
તસ્માદેતત્પવિત્રં તસ્ય ન્યસનમ્ ॥

યો વા એતં નારસિંહં ચક્રમધીતે સ સર્વેષુ વેદેષ્વધીતો ભવતિ ।
સ સર્વેષુ યજ્ઞેષુ યાજકો ભવતિ । સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ ।
સ સર્વેષુ મન્ત્રેષુ સિદ્ધો ભવતિ । સ સર્વત્ર શુદ્ધો ભવતિ ।
સ સર્વરક્ષો ભવતિ । ભૂતપિશાચશાકિનીપ્રેતવન્તાકનાશકો ભવતિ ।
સ નિર્ભયો ભવતિ । તદેતન્નાશ્રદ્દધાનાય પ્રબ્રૂયાત્તદેતન્નાશ્રદ્દધાનાય
પ્રબ્રૂયાદિતિ ॥

(વૈષ્ણવ-ઉપનિષદઃ)

ઇત્યાથર્વણીયે નૃસિંહષટ્ચક્રોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Nrisimhashatchakra Upanishad*

pdf was typeset on October 29, 2020

Please send corrections to *sanskrit@cheerful.com*